# श्रीरूपगोस्वामिविरचितो बृहद्ध्यानः

कोणेनाक्ष्णोः पृथुरुचिः मिथो हारिणा लिह्यमानाव्
एकैकेन प्रचुरपुलकेनोपगुढौ भुजेन ।
गौरीश्यामौ वसनयुगलं श्यामगौरं वसानौ
राधाकृष्णौ स्मरविलसितोद्दामतृष्णौ स्मरामि ॥१॥

भृङ्गान्सुहृद्वदनगन्धभरेण लोलान्
लीलाम्बुजेन मृदुलेन निवारयन्त्या ।
उद्वीक्ष्यमाणमुखचन्द्रमसौ रसौघ
विस्तारिणा ललितया नयनाञ्चलेन ॥२॥

चामरभनवमञ्जुमञ्जरी
भ्राजमानकरया विशाखया ।
चित्रया च किल दक्षवामयोर्
वीज्यमानवपुषौ विलासतः ॥३॥

नागवल्लिदलबद्धवीटिका
सम्पूटस्फुरितपाणिपद्मया ।
चम्पकादिलतया सकम्पया
दृष्टपृष्टतटरूपसम्पदौ ॥४॥

रम्येन्दुलेखाकलगीतमिश्रितैर्
वंशीविलासानुगुणैर्गुणज्ञया ।
वीणानिनादप्रसरैः पुरस्थया
प्रारब्धरङ्गौ किल तुङ्गविद्यया ॥५॥

तरङ्गदङ्ग्या किल रङ्गदेव्या
सव्ये सुदेव्या च शनैरसव्ये ।
श्लक्ष्णाभिमर्शनविमृज्यमान
स्वेदाश्रुधारौ सिचयाञ्चलेन ॥६ ॥